## अनुर्लक्षणे। (८४/५४७)

[1]अनुशब्दो लक्षणे द्योत्ये कर्मप्रवचनीयसञ्ज्ञो भवति। शाकल्यस्य संहितामनु प्रावर्षत् (म.भा. १. ३४६)। [2]अनडुद्यज्ञमन्वसिञ्चत्। अगस्त्यमन्वसिञ्चन् प्रजाः। किमर्थमिदमुच्यते, यावता 'लक्षणेत्थम्भूताख्यान°' (१. ४. ९०/५५२) [3]इति सिद्धैवानोः कर्मप्रवचनीयसञ्ज्ञा? हेत्वर्थं तु वचनम् (म. भा. १. ३४७)। [4]हेतुतृतीयां बाधित्वा द्वितीयैव यथा स्यात्॥

## तृतीयार्थे। (८५/५४९)

अनुशब्दस्तृतीयार्थे द्योत्ये कर्मप्रवचनीयसञ्ज्ञो भवति। नदीमन्ववसिता सेना[5]। पर्वतमन्ववसिता सेना। पर्वतेन सम्बद्धा इत्यर्थः॥

## हीने। (८६/५५०)

हीनः [6]इति न्यूनः उच्यते, स चोत्कृष्टापेक्षः। तेनेयं हीनोत्कृष्टसम्बन्धे सञ्ज्ञा [7]विज्ञायते। हीने द्योत्ये [8]अयमनुः कर्मप्रवचनीयसञ्ज्ञो भवति। अनु शाकटायनं [9]वैयाकरणाः। अन्वर्जुनं योद्धारः॥

## उपोऽधिके च। (८७/५५१)

उपशब्दः [10]अधिके हीने च द्योत्ये कर्मप्रवचनीयसञ्ज्ञो भवति। [11]उप खार्यां (२. ३. ९/६४५) द्रोणः। उप निष्के कार्षापणम्। हीने–उप शाकटायनं वैयाकरणाः॥

## अपपरी वर्जने। (८८/५९६)

अपपरी शब्दौ वर्जने द्योत्ये कर्मप्रवचनीयसञ्ज्ञौ भवतः। [12]प्रकृतेन सम्बन्धिना कस्यचिदनभिसम्बन्धः वर्जनम्। अप त्रिगर्तेभ्यो (२. ३. १०/५९८) वृष्टो देवः। परि परि (८. १. ५/२१४१) त्रिगर्तेभ्यो वृष्टो देवः। वर्जने इति किम्? ओदनं परिषिञ्चति॥

---

1. शब्दः नास्ति फ. 2. अनडुद्... उच्यते नास्ति फ. 3. इत्यनेनैव क. 4. हेतौ तृतीयां ह. 5. नद्या सह संबद्धा इत्यर्थः इत्यधिकम्, पर्वत... इत्यर्थः नास्ति ह. 6. इति नास्ति फ. 7. विधीयते ड. फ. ह. 8. अयं नास्ति फ. ह. 9. वैयाकरणाः नास्ति अ. 10. आधिक्ये ह. 11. उपखार्या फ. 12. प्रकृतेन असम्बन्धी अ.